CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

- Title – घटखप्पर काव्य
- Accession No – Title –
- Accession No –
- Folio No/ Pages – ५/ पृ० ४
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language –
- Period –
- Beginning – ऊँ श्री गणाधिपतये नमः। ओंकारं ममब्रह्म शिवमक्षरमव्ययम् यन्नामनन्तिवेदेषु तं प्रपद्ये –
- End – प्रियसखीं क्षमयंति पूजयंति तुल्यं कुर्वन्ति तासा- मतुः सफल एव।
- Colophon-
- Illustrations -
- Source -
- Subject - वर्षाकाल सम्बन्धित
- Revisor -
- Author -
- Remarks- पूर्ण

राहुल कुमार / Rahul kumar

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ॐश्रीगणाधिपतयेनमः॥ ॐकारमस्तंब्रह्मशिवमक्षरमव्ययम् यमामनन्तिवेदेषु तंप्रपद्येगणाधि
पम्॥१॥ प्रोषितपुमदयोदमुच्यते प्रतिषु घटखर्परकेनाम्नयः। प्रोषितेपुमदया परदेशंगतभर्तृकया स
खा मेघमुलिद्दं निचितमित्यादि बहुभाषाभ्यो च्यते हेसखि कीदृशि कुन्दसमानदंति कुंदपुष्पवत्समा
नादंतायस्याःसा तस्यासंबोधनं निचितंव्याप्तमाच्छन्नं खं आकाशं मेघैः नीरदैः किंभूतैर्नीरदैः प्रियही
नाहृदयावनीरदैः प्रियेन भर्त्रा हीनारहिता तस्याहृदयंचित्तं तदेव भुवनी भूमिस्तस्या रदंति विद
रयन्तितासां मनोदूहृदं विदारयंतीत्यर्थः। किंकृत्वा उपेत्य आगत्य तथासलिलैर्जलैर्जलैर्निहतमस्थापितम्

निचितंखमुपेत्यनीरदैः प्रियहीनाहृदयावनीरदैः सलिलैर्निहतंरजःक्षितौरविचं
द्रावपिनोपलक्षितौ॥१॥ हंसानदन्मेघभयाद्द्रवंति निशामुखान्यद्यनचंद्रवन्ति
नवांबुमत्ताः शिखिनोनदन्तिमेघागमेकुंदसमानदन्ति॥२॥

किंतद्रजोधूलिःकस्यांक्षितौभूमौ तथारविचंद्रावपिनोपलक्षितौसूर्यमृगांकौमेघैराच्छादित्वा
न्नदृष्टौ॥१॥ हेकुंदसमानदंति तथैवहंसाश्चक्राङ्काद्रवंतिगच्छंतिकस्मात नदन्मेघभयात गर्
र्जन्मेघसाध्वसात् अद्याधुना निशामुखानि नचंद्रवंति नशशियुक्तानि रजनीमुखानि तथाशि
खिनोमयूरानदंतिशब्दयंति कथंभूताः नवांबुमत्ताः नवेनांबुनामत्ताः नूतनजलेनप्रहृष्टाः ए
तत्सर्वंकस्मिन्कालेमेघागमेतस्मिन्वर्षासमये कुंदसमानदंति कारणानमेतत् चक्राङ्कामा
नसौकसइत्यमरः॥२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

घ०षा०

हे सखि निशि रात्रौ न भाति न शोभते निशा निशीथिनी रात्रिरित्यमरः किं तत् नभः आकाशं किंभूतं नभो विता
रं विगतास्तारका यस्मात्तत् वितारम् निद्रा पश्चात् अभ्युपैति प्राप्नोति कं हरिं विष्णुम् कीदृशं सुखसेवितायं सुखं
सेवते अनुभवतीति यः सुखसेवितास्तं अप्यवा निद्रा किंभूता सुखसेविता सुखेन कल्याणेन सेविता श्रिता
अरंपी घुमभ्युपैति तथा जलदो मेघः संरंभमाटोपमावहति क्वाधुना जलं ददातीति जलदः किंभूतः सें
द्रायुधः इंद्रायुधेन सह वर्तत इति इंद्रचापसहितः किं कुर्वन् सन् रसन् गर्जन् केषां मिभानां गजानां

मेघावृतं निशि न भाति नभो वितारं निद्राभ्युपैति च हरिं सुखसेवितायम् सेंद्रायुध =
श्च जलदोऽद्य रसन्निभानां संरंभमावहति भूधरसन्निभानाम् ॥२॥ सतडिज्जलदार्पि- =
तं नगेषु स्वनदंभोधरभीतपन्नगेषु पथिधीरवधूजलं ददी सुप्रपतात्कृतरूपसुंदरी

किंभूतानां भूधरसन्निभानां गिरेरनलानां नभो न त्विद्गं गगनमित्यमरः इति धनंजयमाला एतत्स
र्वं प्रोषितपुमदयेदमुच्यते ॥२॥ हे सखि निपतति किं जलं केषु पर्वतेषु कीदृशं सतडिज्जलदार्पितं
तडिता सह वर्तते स तडित् स चासौ जलदस्तेनार्पितम् । कीदृशेषु नगेषु स्वनदंभोधरभीतपन्नगेषु
स्वनतश्च ते अंभोभीताः पद्भ्यां न गच्छन्तीति पन्नगा येषु तेषु कीदृशं पथि पथि धीरवधूं पति समंताद्गुरो
गंभीरोरवो यस्य तत् कासु दरीषु गुहासु किंभूतासु अन्यकृतरूपादर्यो यास्ताः तासु अकृत
रूपसुंदरीषु ॥३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

को ऽपि शब्दः संभावने को ऽपि पुरुषः तानि कांतामुखानि भार्यावदनानि संप्रति अधुना प्रसादयति तोषय-
ति आवर्जयतीति यावत् किंभूतानि मुखानि रतिविग्रहकोपितानि रतिसंग्रामात् कोपजातानि जल-
दाः स्वनंतः शब्दायमानाः पथिकान् उत्कंठयंति तद्ध्वनितात् तेषां पथिकानां वधूसु अनंतो ऽपरिमा-
णः शोको वियोगो दुःखं समुद्भवति वर्द्धते प्रोषितप्रमदयेदम् उच्यते ।५। प्रोषितप्रमदया विदेशगत-
भर्तृकया इदं प्राग्युक्तं सर्वम् उच्यते कथ्यते दिनकरस्य भावने रविसमुद्भवे प्रावृड्दिते सति न केवलं भा-
वने प्रावृड्दिते सति किंतु । खात् आकाशात् जलं पतति किंभूते शोकभावने शोको विरहः तं दुःखं भाव-

यं प्रसादयति संप्रति कोपितानि कांतामुखानि रतिविग्रहकोपितानि उत्कंठयन्ति पथि-
कान् जलदाः स्वनन्तः शोकः समुद्भवति तद्ध्वनितात् स्वनन्तः ।।५।। प्रावृड्दिते दिनकरस्य भावने
खाज् जलं पतति शोकभावने । मन्मथे च हृदि हंतुम् उद्यते प्रोषितप्रमदयेदम् उच्यते ।।६।। यात स-
र्वकालम् अवलंघ्य तोयदा आगतास्थ दयितो गतो यदा । निर्दयेन परदेशसेविना मारयि-
ष्यथ तेन मां विना ।।७।।

पति शोकभावनं तस्मिन् न केवलं जलं पतति । मन्मथे च हृदि आधारे हंतुम् उद्यते अवसिते सति ।।६।।
हे तोयदाः यूयम् आगतास्थ । यदा यस्मिन् काले दयितो वल्लभो गतः विदेशस्थः किं कृत्वा आगतास्थ
सर्वं कालम् अवलंघ्य अतिक्रम्य अतिवाह्य इति क्रमम् तेन प्रियेण वल्लभेन विना मां मारयिष्यथ ।
विनाशयिष्यथ किंभूतेन निर्दयेन निर्गता दया करुणा यस्य सः तेन पुनः किंभूतेन परदेश-
सेविना । परदेशं सेवितुं शीलं यस्य सः परदेशसेवी तेन परदेशसेविना ।।७।। रामायनमः ।। श्री ।।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हे घनाः हे मेघाः तं पथिकं यूयं एवं ब्रूवदत किं विशिष्टं पथिकं पांशुलं पांशुर्धूलीता तिस्मादंते इति ।
घ०ष० पांशुलः पांशुलेति पथिक आसौ पांशुलश्च तं किं विशिष्टाः घनाः पथि शीघ्रलं घनाः किं वदत तथा
अन्यदेशरतिरधमच्युतां अन्यदेशरतिः अन्यदेश निवासः हे मूर्ख अस्मिन्वर्षाकाले प्रावृषि मच्य
तं त्यज्यतां अधुना गच्छसि चेत् तदा तव वधूः सा किं मच्यतां किं केष्यतामित्यर्थः ॥८॥ हे घनाः हे मे
घाः तं पथिकं यूयमेव ब्रूत हे पथिक आस्तातावदन्यो बुद्धिमान् अहो जननाथ स्वामिन् हंसपंक्तिर
पि संप्रति प्रस्थिता मानसं प्रति मानससरोवरे लक्ष्मीकं च वियत्साकाशे अन्यच्च चातकोपित

ब्रूत तं पथिकं पांशुलं घनाः यूयमेव पथि शीघ्रगं घनाः अन्यदेशरतिरद्य मुच्यतां सा
घृणा तव वधूः कि मुच्यतां ॥८॥ हंसपंक्तिरपि नाथ संप्रति प्रस्थिता वियति मानसं प्रति ।
चातकोपि तृषितो बु याचते दुःखिता पथिक सा प्रिया चते ॥९॥ नीलशष्पमतिभाति केकि ॥
कुलं वारि विंदति च चातको मलं अंबुदैः शिखिगणो विना घ्यते कारतिः प्रियविना मयाद्यते

षितो बुयाचते ० चातको बुयाचकः सारंगो जलसको किलः याचते भजते किं अंबु सलिलं किं भू
ताश्चातकाः दुःखिताः पिपासिताः सनदुःखिता पथिक सा प्रिया चतेहे पथिक पांथ प्रिया सातेतव
वनिता दुःखिता जनित विरहेत्यर्थः ॥९॥ अतिभाति अतिशायेन शोभते किं नीलशष्पं नूतनत
णं किं भूतं कोमलपेशलं सकुमारं नकेवलं नीलशष्पमतिभाति अपि च शिखिगणो विनाद्य
ते मयूरसमूहः कूजति केरंबुदैर्मेघैः हे प्रियाद्यास्मिन्काले मया विनाते का रतिः का प्रीतिः चात
कोपि अमलं वारि विन्दति प्राप्यते ॥१०॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्मिन्काले भवन्ति केकलापिनः कलापश्चन्द्रकान्वितं जनिता निकलापानि कलापं विद्यते येषां ते क
लापिनः शिखिनः कीदृशाः प्रोषिताहृदयं तत्शोकं कलापयितुं ग्राहयितुं शीलं येषां ते कलापिनः पु
नः कीदृशाः ते मेघशब्दमुदिताः घनगर्जितलुब्धाः अपि च अवसाद्यते का सा ते तव प्रिया किंदृशी
तोयदागमकृशा वर्षाकाले दुर्वला कृशा अपि वर्षाकालेन अवसाद्यते किं विशिष्टेन मदनेन दु मदने ४
र्द्धरेण दुःसहेनेत्यर्थः यथा विरहिणी प्रावृट्काले दुःखिता भवतीत्यर्थः ॥११॥ यथा हे मेघाः तं पथि
कं पूर्णं एवं ब्रूत यत्त्वत्किं कृपाधिना [illegible] कान्तया योषिता सह किं विशिष्टया पाण्डुगण्डपतितालकं

मेघशब्दमुदिताः कलापिनः प्रोषिताहृदयशोककलापिनः। तोयदागमकृशा वसाद्य
ते दुर्द्धरेण मदनेन साध्यते ॥११॥ किं कृपाधितवनास्ति कान्तया पाण्डुगण्डपतितालकां
तया शोकसागरजले च पातितां त्वद्गुणस्मरणमेव पातिताम् ॥१२॥ कुसुमितकुट
जेषु काननेषु प्रियरहितेषु समस्तकाननेषु। वहति च कलुषे जले नदीनां किमिति च मां स
मवेक्षसे न दीनाम् ॥१३॥

तया पाण्डुश्चतौ गण्डौ पाण्डुगण्डयोः पतिता अलकां तायस्याः सा तया अन्यच्च त्वद्गुणस्मरणमेव तां पा
ति किंदृशीं तां शोकसागरजले च पातितां प्राप्तां वर्षासु शोकवाकुलत्वात् सागरस्योपमा ॥१२॥ हे स
नू नास्ति पथिकं पूर्वं ब्रूत। अस्मिन्वर्षाकाले मां किं न समवेक्षसे नागत्य संभावयसि कीदृशीं मां दी
नां कृपणां केषु सत्सु [illegible] काननेषु कीदृशेषु कुसुमितकुटजेषु कुसुमिताः कुटजाः येषु तानि
कुसुमितकुटजानि तेषु प्रावृट्कालेषु इत्यर्थः। पुनः किंभूतेषु काननेषु समस्तकानि मानना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नि३त्कंठितानि मुखानि येषु तानि समुत्कंठकाननानि तेषु। नकेवलं तथाविधेषु नदीनां जलेवह
ति किंभूते कलुषे अप्रसन्ने दुर्दशे काले ॥२३॥ ॥यत्राहे सखि कदंबहं जहांत्वं प्रियवियोग॰
जशोकदाहम् प्रियो वल्लभस्तस्य वियोगो विरहस्तत् किंविशिष्टाहं गंभीरमेघरसितगर्जितकंपिता
केषु सलभारोपुक यंभूतेषु विनाश्रितेषु विनाशं प्रापितेषु केन मेघसलिलेन अन्यच्च कामः कंदर्पो
धनुः तत्स्फुरति कथं विनातेन वल्लभेन किंविशिष्टधनुः शितेषु शिलास्त्री हृण पुष्पवो यस्य तत्ते
शितेषु एतेन वर्षाकाले कामो बलवानुक्तं ॥२४॥ यत्रास्मिन्वर्षाकाले वनानि भांति केषां के

मार्गेषु मेघसलिलेन विनाशितेषु कामो धनुः स्पृशति तेन विनाशितेषु गंभीरमेघ
रसितकंपिताकदाहं जहांसखिप्रियवियोगजशोकदाहं ॥२४॥ नववारिकणैर्विराजि
तानां स्वनदंभोधरवातवीजितानां मनोदस्य कृते निकेतनानां प्रतिभांत्यवनानि के॰
तकानां ॥२५॥

तकानां किंविशिष्टानां विराजितानां विशिष्टदीप्तिं प्रापितानां कैः नववारिकणैः नवं च तद्वारि त
स्य कणैः नवजलशीकरैः पुनः कीदृशानां स्वनदंभोधरवातवीजितानां अंभोजलं तद्धारयंति
अंभोधराः स्वनंतश्च ते अंभोधराः स्वनदंभोधरास्तेषां वातः समीरस्तेन वीजितानि चलिता
नि तेषां स्वनदंभोधरवातवीजितानां पुनरपि कीदृशानां गृहाणां कृते कस्य मदनस्य व॰
र्षाकाले केतकीकुसुमानि भवंति ततः कारणात्कामो निवसति तत्रेत्यर्थः ॥२५॥ रामराम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

7

हेकामनिवाससर्ज त्वां यत्ससर्ज सपूर्वान कः प्रजापतिः स्रष्टा तत्साधु शोभनं निवसनं निवासः अस्यपः
कस्य कामस्य निवासः सर्वासौसर्ज अस्य सर्वद्र विशेषः कामनिवाससर्ज कौशलं वनानां मध्ये पुव
रः प्रधानं काभिः कुसुमितलताप्रवरमंजरीभिः कुसुमितलताभिः नकेवलं मंजरीभिः पुवरो नेत्रोत्स
वस्त्वमसि नेत्राणामुत्सवो नेत्रोत्सवः आनंदस्त्वं भवसि केषां सयौवनानां यौवनेन महत्व वर्तत इति सयो
वनास्तेषां सर्जकुसुमानितरूणां तेषां कारणानिर्भवती सखीः १६॥ हेनवकदंब वतेतव शिरस्स
प्रसाभितास्मि रत्सखीः यतः कारणात् तेतव कुसुमास्मिते मदनः कंदर्पो वसति कुसुमस्मितं हसि

तत्साधु यत्त्वां सततं ससर्ज प्रजापतिः कामनिवाससर्ज। त्वं मंजरीभिः प्रवरो वनानां ने
त्रोत्सवश्चासि सयौवनानां॥१६॥ नवकदंब शिरोवनितास्मिते वसति ते मदनः कुसुमा
स्मिते। कुटज किं कुसुमैरुपहस्यते पुनरमितास्मि सदुःखसहस्यते॥१७॥ तरुवर विन
तास्मितसदहं हृदयं मे प्रकरोषि किं सदहं। तव कुसुमनिरीक्षणाददेहं विसृजेयं सहसा
वतापदेहं॥१८॥

तंकुसुमास्मितं अन्यच्च कुटज किं उपहस्यते कैः कुसुमैः यतस्ते पुनरमितास्मि कथंभूतस्यते
अतिदुःखसहस्य अतिशयेन दुःखेन सह्यते स तस्य कुटजतरो अत्र कोमि प्रायः प्राव बिंदुःस
हेभवति॥१७॥ तया हे तरुवर नीपकदंब ते तव सदा विनतास्मि अहमेव विज्ञापते मे हृदयं किं
सदहं करोषि यतस्तव कुसुमप्रसून निरीक्षणेऽवलोकने अप्रसन्नवदेहं वपुरहं विसृजेयमक
यं सहसा अविंबमिति एतेन किमुक्तं भवति यथा वर्षाकाले भवान् भवति नीपः दुःखदः नके
वलं कुटज कदंबौ दुःप्रसहौ अपरोपि प्रियविरहितानां दुःप्रसहो भवती सखीः॥१८॥ श्रीरामः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४ 8

घ०ष०

भ्रमरः चुंबति भृंगः आस्वादयति किं यूथिकालतां कीदृशीं उपशोभितां कैः कुसुमैः पुष्पैः किंभू
तैः शितैः शुभ्रैः पुनः कीदृशैः घनमुक्तांबुलवप्रकाशितैः घनेन मेघेन मुक्तं यदंबु तत् घनमु
क्तांबु तस्य लवाः कणाः तैः प्रकाशितानि विकाशितानि तैः घनमुक्तांबुप्रकाशितैः किं कृत्वा स
मवेक्ष्य दृष्ट्वा कां कालतां अंकुरितां कस्य मधुनः वसंतस्य ॥१९॥ हे घनाः तं पथिकं यूयमेव

कुसुमैरुपशोभितां शितैर्घनमुक्तांबुलवप्रकाशितैः। मधुनः समवेक्ष्य काल
तां भ्रमरश्चुंबति यूथिकालतां ॥१९॥ तासामृतुः सफल एव हि या दिनेषु सेंद्रायु
धांबुधरगर्जितदुर्दिनेषु। रत्युत्सवं प्रियतमैः सह मानयन्ति मेघागमे प्रि
यसखीश्च समानयन्ति ॥२० एतन्निशम्य विरहानलपीडितायाः तस्या वचः
खलु दयालुरपीडितायाः साध्वीति रवसमुद्धितं जलदेन मोघैः प्रत्याययौ सद
नमून दिनैरमोघैः ॥२१॥ इति घटकर्परकाव्यं समाप्तम् ॥ हरिरामस्येदं स्यात ॥

वृतयाः रत्युत्सवं प्रियतमैः सह मानयंति भुंजंति कस्मिन्काले मेघागमे केषु दिनेषु किंभू
तेषु सेंद्रायुधांबुधरगर्जितदुर्दिनेषु न केवलं मानयंति प्रियसखीश्च समानयंति पूज
यंति तुल्याः कुर्वंति तासामृतुः सफल एव ॥२०॥

४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA